# चिन्मयमहिमा

नत्वा सद्गुरुपदारविन्दं कुर्मश्चिन्मयमहिमागानम्।
भुक्तिमुक्तिदमङ्गलरूपं गुरुं स्मरामस्सदा प्रसन्नम्॥ १॥ *चिन्मय गुरवे नमो नमः चिन्मय गुरवे नमो नमः*
केरलदेशे प्रकटित चिन्मय बालकृष्णनाम्ना युत चिन्मय।
चट्टम्बीगुरुशिक्षित चिन्मय शैशवे हि संस्कारित चिन्मय॥ २॥
चञ्चलमानसबालक चिन्मय तथापि शिवध्याने रत चिन्मय।
क्रीडाप्रवीण युवप्रिय चिन्मय विद्याग्रहण कुशलवर चिन्मय॥ ३॥
लखनऊ नगरे शिक्षित चिन्मय विधिभाषाङ्ग्लविशारद चिन्मय।
वृत्तपत्रलेखककवर चिन्मय स्वतन्त्रतासङ्ग्रामक चिन्मय॥ ४॥
तदर्थकारागृहगत चिन्मय ततः शिवानन्दाश्रित चिन्मय।
संन्यासे गुरुदीक्षित चिन्मय चिन्मयानन्दाभिधान चिन्मय॥ ५॥
उत्तरकाश्याश्रमगत चिन्मय स्वामितपोवनप्रशिष्य चिन्मय।
शास्त्राध्यात्मपठनरत चिन्मय प्रीतिप्राप्तगुरुप्रसाद चिन्मय॥ ६॥
गङ्गादर्शनप्रेरित चिन्मय ज्ञानयज्ञप्रारम्भक चिन्मय।
असङ्ख्य जनप्रियप्रेरक चिन्मय चिन्मयसंस्थास्थापक चिन्मय॥ ७॥
गीताज्ञानप्रचारक चिन्मय आश्रमसान्दीपनिकृत चिन्मय।
अनेक मन्दिरनिर्मित चिन्मय उपकारकसाधकजन चिन्मय॥ ८॥
करुणापूरितमानस चिन्मय सकलजनानां हितरत चिन्मय।
बालकयुवकप्रशिक्षक चिन्मय विद्यालयसंस्थापक चिन्मय॥ ९॥
समाजसेवाप्रेरक चिन्मय स्वास्थ्यचिकित्सादायक चिन्मय।
संस्कृतगौरवस्थापक चिन्मय ग्रन्थानेकप्रकाशक चिन्मय॥ १०॥
ज्ञानभक्तिसेवामय चिन्मय नित्यशुद्धगुरुविमुक्त चिन्मय।
महासमाधौ संस्थित चिन्मय भक्तिरस्तु नस्त्वयि हे चिन्मय॥ ११॥

*चिन्मय गुरवे नमो नमः चिन्मय गुरवे नमो नमः*

श्री चिन्मयसद्गुरवे अर्पितम्
९ जानेवरी २०१३ सान्दीपनिसाधनालय सुवर्णोत्सवे

# cinmayamahimā

natvā sadgurupadāravindaṁ kurmaścinmayamahimāgānam |
bhuktimuktidamaṅgalarūpaṁ guruṁ smarāmassadā prasannam || 1 ||
*cinmaya gurave namo namaḥ* *cinmaya gurave namo namaḥ*

keraladeśe prakaṭita cinmaya bālakṛṣṇanāmnā yuta cinmaya |
caṭṭambīguruśikṣita cinmaya śaiśave hi saṁskārita cinmaya || 2 ||

cañcalamānasabālaka cinmaya tathāpi śivadhyāne rata cinmaya |
krīḍāpravīṇa yuvapriya cinmaya vidyāgrahaṇa kuśalavara cinmaya || 3 ||

lakhanaū nagare śikṣita cinmaya vidhibhāṣāṅglaviśārada cinmaya |
vṛttapatralekhakavara cinmaya svatantratāsaṅgrāmaka cinmaya || 4 ||

tadarthakārāgṛhagata cinmaya tataḥ śivānandāśrita cinmaya |
saṁnyāse gurudīkṣita cinmaya cinmayānandābhidhāna cinmaya || 5 ||

uttarakāśyāśramagata cinmaya svāmitapovanapraśiṣya cinmaya |
śāstrādhyātmapaṭhanarata cinmaya prītiprāptaguruprasāda cinmaya || 6 ||

gaṅgādarśanaprerita cinmaya jñānayajñaprārambhaka cinmaya |
asaṅkhya janapriyapreraka cinmaya cinmayasaṁsthāsthāpaka cinmaya || 7 ||

gītājñānapracāraka cinmaya āśramasāndīpanikṛta cinmaya |
aneka mandiranirmita cinmaya upakārakasādhakajana cinmaya || 8 ||

karuṇāpūritamānasa cinmaya sakalajanānāṁ hitarata cinmaya |
bālakayuvakapraśikṣaka cinmaya vidyālayasaṁsthāpaka cinmaya || 9 ||

samājasevāpreraka cinmaya svāsthyacikitsādāyaka cinmaya |
saṁskṛtagauravasthāpaka cinmaya granthānekaprakāśaka cinmaya || 10 ||

jñānabhaktisevāmaya cinmaya nityaśuddhaguruvimukta cinmaya |
mahāsamādhau saṁsthita cinmaya bhaktirastu nastvayi he cinmaya || 11 ||

*cinmaya gurave namo namaḥ* *cinmaya gurave namo namaḥ*

śrī cinmayasadgurave arpitam
9 jānevarī 2013 sāndīpanisādhanālaya suvarṇotsave